ಹೊಸ ಪಠ್ಯಕ್ರಮ (೨೦೦೫-೦೬ ಮತ್ತು ೨೦೦೬-೦೭ ಶೈಕ್ಷಣಿಕ ವರ್ಷದಲ್ಲಿ ಅಭ್ಯಾಸ ಮಾಡಿದ ವಿದ್ಯಾರ್ಥಿಗಳಿಗೆ)
**New Scheme** ( For Students studied during the Years 2005-06 & 2006-07 )

**Code No. 09-NS**

Total No. of Questions : 43 ] [ Total No. of Printed Pages : 7

**July, 2007**

# SANSKRIT

**( New Syllabus )**

Time : 3 Hours ] [ Max. Marks : 90

I. एतेषां दशानामपि प्रश्नानां उत्तराणि एकैक वाक्येन संस्कृत भाषायां लिखत — 10 × 1 = 10

1) केषां प्रतिमाः देवकुले स्थाप्यन्ते ?

2) 'आर्य' इति कस्य कुलस्य आलापः ?

3) कासां हस्तस्पर्शः अजलस्य जलाञ्जलिः भवति ?

4) उदयनस्य प्रधानामात्यः कः ?

5) वत्सराजस्य विश्वासस्थानं कः ?

6) कां न दहत्येव पावकः ?

7) बाभ्रव्यः कस्यान्तिके प्रेषितः ?

8) कुन्त्याः अपरं नाम किम् ?

9) कः क्षत्रियाणां धर्मः ?

10) कुरुपितामहः कः ?

[ Turn over

II. एतेषु त्रयाणां भाषान्तरं कृत्वा भावं विशदयत — 3 × 4 = 12

11) वयमयशसा चीरेणार्यो नृपो गृहमृत्युना

प्रततरुदितैः कृत्स्नायोध्या मृगैः सह लक्ष्मणः ।

दयिततनयाः शोकेनाम्बाः स्नुषाध्वपरिश्रमैः

धिगिति वचसा चोग्रेणात्मा त्वया ननु योजिताः ॥

12) सव्याजैः शपथैः प्रियेण वचसा चिन्तानुवृत्त्याधिकं

वैलक्ष्येण परेण पादपतनैर्वाक्यैः सखीनां मुहुः ।

प्रत्यापत्तिमुपागता न हि तथा देवी रुदत्या यथा

प्रक्षाल्येव तयैव बाष्पसलिलैः कोपोऽपनीतः स्वयम् ॥

13) नीतो विक्रमबाहुरात्मसमतां प्राप्तेयमुर्वीतले

सारं सागरिका ससागरमहीप्राप्त्येकहेतुः प्रिया ।

देवी प्रीतिमुपागता च भगिनी लाभाज्जिताः कोसलाः

किं नास्ति त्वयि सत्यमात्यवृषभे यस्मै करोमि स्पहाम् ॥

14) दृष्टिदोषो महानेषः यन्मां पश्यसि मानुषम् ।

मृत्युं पुरः स्थितं विद्धि हन्तुं त्वां धर्मदूषणम् ॥

15) अवाच्यं वाच्यं वा किमिव चरतां भैक्षमनिशं

प्रहारं हारं वा खर इह समानं गणयति ।

धनुः सज्यं त्यक्त्वा दधति यदिमे पाण्डुतनयाः

कपालं तच्चित्रं दलति न हि तेऽद्यपि हृदयम् ॥

III. अ) **एकस्य** उत्तरं प्रादेशिक भाषायां वा आंग्लभाषायां वा प्रबंधरूपेण उत्तरं लिखत — 1 × 8 = 8

16) 'प्रतिमागृहम्' इत्यस्य शीर्षिकां समर्थयत ।

17) 'एकचक्रानगरं' प्रति समापतिता समस्या का ? सा कथं परिहृता ?

आ) **द्वयोरेव** लघुटिप्पण्यौ प्रादेशिक भाषायां आंग्लभाषायां वा लिखत — 2 × 4 = 8

18) प्रवेशकः

19) विदूषकः

20) ऐन्द्रजालिकः

21) भीमबकयोः संवादः ।

IV. चतुर्णां सन्दर्भं संस्कृतभाषायां सूचयत — 4 × 3 = 12

22) हस्तस्पर्शो हि मातॄणामजलस्य जलाञ्जलिः ।

23) भर्तृद्रोहादस्तु मातापयमाता ।

24) तथा कुरु यथा बन्धुजनो न स्मरति ।

25) अतिनिर्घृणं खलु कृतं देव्या ।

26) न हि व्याघ्रो हरिणीमनुकम्पमानो दृष्टः ।

27) नास्ति मे कश्चिदनिष्टः पुत्रः ।

V. अ) एकस्य उत्तरं प्रादेशिक भाषायां आंग्लभाषायां वा लिखत — 1 × 10 = 10

28) चन्द्रहासं मारयितुं दुष्टबुद्धिना कृतमुपायं तस्य परिणामं च विशदयत ।

29) 'त्रीणि अङ्गुलीयकानि' इति कथां संग्रहेण निरूपयत ।

आ) द्वयोरेव प्रादेशिक भाषायां आंग्लभाषायां वा लघुटिप्पण्यौ लिखत — 2 × 5 = 10

30) पुरोहितः ।

31) विषया ।

32) नाथनः ।

33) शृगालः ।

VI. पञ्चानां उपप्रश्नानां संस्कृत भाषायां उत्तराणि लिखत — 5 × 2 = 10

34) द्वयोः सन्धिं विभज्य संधिनामं लिखत —

जलाञ्जलिः, तवैतया, यावदहम् , शूराश्च ।

35) द्वयोः लिङ्गविभक्ति-वचनानि लिखत —

आर्यस्य, अश्रूणि, प्रियायाः, भोजनम् ।

36) द्वयोः लकारपुरुष वचनानि निर्दिशत —

अन्विष्यामि, अटन्ति, गच्छ, वदसि ।

37) द्वयोः विग्रहवाक्यं लिखत —

अनुत्तराः, ज्येष्ठभ्रातः, महाराजः, गोपहीना ।

38) द्वयोः व्याकरणरीत्या पदपरिचयं लिखत—

भणित्वा, ज्ञातुम् , पतन् , भवितव्यम् ।

39) प्रयोगपरिवर्तनं कुरुत —

सः पायसं पिबति ।

अथवा

अहं भवन्तं न प्रतिषेधयामि ।

40) एतयोः वाक्ययोः व्याकरणदोषं परिहृत्य लिखत —

i) अलं चिन्ता ।

ii) नमोऽस्तु धर्मपरायणम् ।

41) अत्रत्यमलङ्कारं सलक्षणं निर्दिशत —

पिपासार्तोऽनुधावामि क्षीणतोयां नदीमिव ।

VII. 42) संस्कृतभाषायां अनुवदत — 5

ಪಾರ್ವತಿಯು ಅಪ್ರತಿಮ ಸುಂದರಿಯಾಗಿದ್ದಳು. ಅವಳು ತನ್ನ ಸೌಂದರ್ಯದಿಂದ ಶಿವನನ್ನು ಒಲಿಸಿಕೊಳ್ಳಬಹುದೆಂದು ಭಾವಿಸಿದ್ದಳು. ಅವಳು ಶಿವನಿಗೆ ನಮಸ್ಕರಿಸುತ್ತಿದ್ದಾಗ ಮನ್ಮಥನೂ ಅಲ್ಲಿಗೆ ಬಂದನು. ಅವನು ತನ್ನ ಧನಸ್ಸಿಗೆ ಸಮ್ಮೋಹನಾಸ್ತ್ರವನ್ನು ಹೂಡಿದನು. ಮನ್ಮಥನು ತನ್ನ ತಪಸ್ಸಿಗೆ ಭಂಗ ತಂದುದರಿಂದ ಕುಪಿತಗೊಂಡ ಶಿವನು, ತನ್ನ ಹಣೆಗಣ್ಣನ್ನು ತೆರೆದು ಅವನನ್ನು ಸುಟ್ಟು ಭಸ್ಮಗೈದನು. ಆದರೆ ಪಾರ್ವತಿಯು ತನ್ನ ಉಗ್ರ ತಪಸ್ಸಿನಿಂದ ಶಿವನ ಹೃದಯವನ್ನು ಗೆದ್ದಳು.

Parvati was exceedingly beautiful. She had thought that she could attract Shiva by her beauty and charm. While she was bowing down to Shiva, Manmatha also came there. He fixed the Sammohana arrow to his bow. But Shiva reduced Madana to ashes with the fire of his eye as he attempted to disturb the mood of his austerities. But Parvati won the heart of Shiva later by means of her rigorous austerities.

43) इमं परिच्छेदं पठित्वा प्रश्नानां उत्तराणि लिखत — 5 × 1 = 5

अस्माकं परितः पर्वताः वृक्षाः नद्यः च सन्ति । यदा वायुमण्डले धूमेभ्यः वायुः मलिनः भवति तदा वायुमालिन्यं भवति । यदा सरोवरेषु नदीषु जलं रासायनिकवस्तुयुक्तेन दूषितजलेन प्रदूषितं भवति तदा जलमालिन्यं भवति । यदा वृक्षाणां नाशः भवति तदा परिसरनाशः भवति । शब्दः वातावरणे यदा अधिकं भवति तदा शब्दमालिन्यं भवति । अनेन जनजीवनं दुःखकरम् भवति । यत्र मालिन्यं न सम्भवति तत्र जनजीवनम् आरोग्यकरं सुखकरं च वर्तते । अतः परिसरसंरक्षणम् आवश्यकं भवति । वृक्षाणां नाशः न करणीयः जले मालिन्यं यथा न भवेत् तथा रक्षणीयम् । प्राणिकुलं पोषणीयं पक्षिकुलं च रक्षणीयम् । एवं रीत्या परिसरसंरक्षणं करणीयम् ।

i) वायुः कथं मलिनः भवति ?

ii) कदा परिसरनाशः भवति ?

iii) यत्र मालिन्यः न सम्भवति तत्र किं वर्तते ?

iv) किं आवश्यकं भयति ?

v) कथं परिसररक्षणं करणीयम् ?

**अथवा**

विरामार्थं प्रार्थनां कुर्वन् स्वीय महाविद्यालयस्य प्राचार्याय पत्रमेकं लिखत ।